भूर्जकण्टकः, पुं, वर्णसङ्करजातिविशेषः । इति जटाधरः ॥ (यथा, मनौ । १० । २१ ।
"व्रात्यात्तु जायते विप्रात् पापात्मा भूर्ज-कण्टकः ॥")

भूर्ज्जपत्रः, पुं, (भुवि ऊर्ज्जस्विभ्यः उपदेवजातिभ्यः पत्रमस्य ।) भूर्ज्जवृक्षः । इति रत्नमाला ॥ (यथा, रामायणे । २ । ६४ । २४ ।
"कुङ्कमागरुपुन्नागभूर्जपत्रोत्तरच्छदान् ॥")
तथा चास्य पर्य्यायः ।
"भूर्ज्जपत्रः स्मृतो भूर्ज्जश्चर्म्मी बहुलवल्कलः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥

भूर्णिः, स्त्री, (बिभर्त्ति सर्व्वमिति । भृ + "घृणिपृश्निपार्ष्णिचूर्णिभूर्णिः ।"उणा० ४ । ५२ । इति निः निपातनादूत्त्वञ्च ।) पृथिवी । मरुभूमिः । इत्युणादिकोषः ॥ (भर्त्ता । यथा, ऋग्वेदे ।७।८७।२।
"आत्मा ते वातो रज आनवीनोत्-
पशु र्न भूर्णिर्यवसे स सवान् ॥"
"भूर्णिर्जगतो भर्त्ता ।" इति तद्भाष्ये सायनः ॥)

भूर्लोकः, पुं, (भूःसंज्ञको लोकः । शाकपार्थिवादिवत् समासः ।) अन्तरीक्षादधो लोकः । मर्त्यलोकः । तस्य लक्षणं यथा,—
"पादगम्यञ्च यत्किञ्चित् वस्त्वस्ति पृथिवीमयम् ।
स भूर्लोकः समाख्यातो विस्तारोऽस्य मयोदितः ॥"
इति विष्णुपुराणे । २ अंशे ५ अध्यायः ॥ चरणसञ्चारयोग्यं गिरिशिखरादि यावत् तावदुर्व्वेधो भूर्लोक इत्यर्थः । विस्तारो मयोदितः सर्व्वतो लोकालोकावधिः पञ्चविंशतिकोटिप्रमाणः । इति तट्टीकायां स्वामी ॥ अस्य विवरणं तत्रैव द्वितीयादिचतुर्थाध्यायेषु भूगोलशब्दे च द्रष्टव्यम् ॥ (यथा, भागवते । २ । ५ । ३८ ।
भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभितः ॥")

भूलग्ना, स्त्री, (भुवि लग्ना ।) शङ्खपुष्पी । इति राजनिर्घण्टः ॥

भूलता, स्त्री, (भुवि लता इव ।) किञ्चुलुकः । इति हेमचन्द्रः । ४ । २६६ ॥

भूवदरी, स्त्री, (भूलग्ना वदरी शाकपार्थिवादिवत् समासः ।) क्षुद्रकोली । झड़वेर इति हिन्दीभाषा । तत्पर्य्यायः । क्षितिवदरी २ वल्लीवदरी ३ वदरवल्ली ४ बहुफलिका ५ लघुवदरी ६ वदरफली ७ सूक्ष्मवदरी ८ । अस्या गुणाः । मधुराम्लत्वम् । कफवातविकारहारित्वम् । पथ्यत्वम् । दीपनत्वम् । पाचनत्वम् । किञ्चित् पित्तास्रकारित्वम् । रुच्यत्वञ्च । इति राजनिर्घण्टः ॥

भूशयः, पुं, (भुवि शेते इति । भू + शीङ् + "अधिकरणे शेतेः ।"३ । २ । १५ । इति अच् ।) नकुलगोधादिः । एतेषां मांसगुणाः । गुरुत्वम् । उष्णत्वम् । मधुरत्वम् । स्निग्धत्वम् । वायुनाशित्वम् । शुक्रकारित्वञ्च । इति राजवल्लभः ॥ विष्णुः । यथा,—
"भूशयो भूषणो भूतिर्विशोकः शोकनाशनः ॥"
इति महाभारते तस्य सहस्रनामस्तोत्रम् ॥

भूशेलुः, पुं, (भुवि ख्याता शेलुः शाकपार्थिवादिवत् समासः ।) भूकर्व्वुदारकः । इति राजनिर्घण्टः ॥

भूष कि भूषणे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) कि भूषयति भूषति हारो जनम् । इति दुर्गादासः ॥

भूषणं, क्ली, (भूष्यते अनेनेति । भूष + करणे ल्युट् ।) अलङ्कारः । इति हेमचन्द्रः ।३।३१३॥ (यथा, चाणक्यसंग्रहे । ८ ।
"नक्षत्रभूषणं चन्द्रो नारीणां भूषणं पतिः ॥")
देवदेयभूषणादि यथा,—
"भोग्यभूषोत्तमं नित्यं भूषणानि प्रशृणु मे ।
किरीटञ्च शिरोरत्नं कुण्डलञ्च ललाटिका ॥
तालपत्रञ्च हारञ्च ग्रैवेयकमथोर्म्मिका ।
प्रालम्बिका रत्नसूत्रमुत्तङ्गोऽथर्क्षमालिका ॥
पार्श्वद्योतो नखद्योतो ह्यङ्गुलीच्छादकस्तथा ।
कटिलग्नं माणवको मूर्द्धतारा ललन्तिका ॥
अङ्गदो बाहुवलयः शिखाभूषणमिङ्गिका ।
शाणखण्डञ्च तद्भार्य्यं नाभिपूरोऽथ मालिका ॥
सप्तकी शृङ्खलञ्चैव दन्तपत्रञ्च वर्णकः ।
ऊरुसूत्रञ्च नीवी च मुष्टिबन्धं प्रकीर्णकम् ॥
पादाङ्गदं हंसकञ्च नूपुरं क्षुद्रघण्टिका ।
मुखपट्टमिति प्रोक्ता अलङ्काराः सुशोभनाः ॥
चत्वारिंशदमी प्रोक्ता लोके वेदे च सौख्यदाः ।
अलङ्काराः प्रदानेन चतुर्व्वर्गप्रदायकाः ॥
एतेषां पूजनं कृत्वा प्रदद्यादिष्टसिद्धये ।
तेषां दैवतमुच्चार्य्य पूजयेत्तु विचक्षणः ॥
शिरोगतानि चाददात् सौवर्णानि तु सर्व्वदा ।
चूड़ारत्नादिकानीह भूषणानि तु भैरव ! ॥
ग्रैवेयकादि हंसान्तं सौवर्णं राजतञ्च वा ।
निवेदयेत्तु देवेभ्यो नान्यतैजससम्भवम् ॥
रीतिवङ्गादिसंजातं पात्रोपकरणादिकम् ।
दद्यादायसवर्ज्जन्तु भूषणं न कदाचन ॥
घण्टाचामरकुम्भादि पात्रोपकरणादिकम् ।
तद्भूषणान्तरे दद्याद् यस्मात्तदुपभूषणम् ॥
सर्व्वं ताम्रमयं दद्याद्युतकिञ्चिद्भूषणादिकम् ।
सर्व्वञ्च स्वर्णवत्ताम्रमर्घ्यपात्रे ततोऽधिकम् ॥
पूजार्घ्यपात्रं नैवेद्याधारपात्रञ्च पानकम् ।
औडुम्बरं सदा विष्णोः प्रीतिदं तोषदं तदा ॥
ताम्रे देवाः प्रमोदन्ते ताम्रे देवाः सदा स्थिताः ।
सर्व्वप्रीतिकरं ताम्रं तस्मात्ताम्रं प्रयोजयेत् ॥
स्वोपयोगे नरः कुर्य्याद्देवानामपि भैरव ! ।
शीवोद्देशे रौप्यन्तु न कदाचिच्च भूषणम् ॥
प्रावारः पानपात्रञ्च गेण्डुकं गृहमेव च ।
पर्य्यङ्कादि यदन्यच्च सर्व्वं तदुपभूषणम् ॥
कायोमयन्त्वते कांस्यन्ते यद्भूषणं भवेत् ।
स्वर्णरौप्यस्य चाभावे लघःकाये नियोजयेत् ॥
...षां भूषणादीनां यद्ददातुं शक्यते नरैः ।
तत्तद्दद्यात् सम्भवे तु सर्व्वमेव प्रदापयेत् ॥
चतुर्व्वर्गप्रदं नित्यं भूषणं सर्व्वसौख्यदम् ।
तुष्टिपुष्टिप्रीतिकरं यथाशक्त्यैव कल्पयेत् ॥
इदं ते भूषणं प्रोक्तं सर्व्वदेवस्य तुष्टिदम् ।"
इति कालिकापुराणे ६८ अध्यायः ॥
अथालङ्कारयुक्तिः । तद्धारणदिनमुच्यते ।
"रेवत्यश्विधनिष्ठासु हस्तादिष्वपि पञ्चसु ।
गुरुशुक्रबुधस्याह्नि वस्त्रालङ्कारधारणम् ॥
अनिष्टेष्वपि निर्द्दिष्टं वस्त्रालङ्कारधारणम् ।
उद्वाहे राजसम्माने ब्राह्मणानाञ्च सम्मते ॥
शिरस्यं मुकुटं हारः कुण्डलञ्चाङ्गदन्तथा ।
कङ्कणं वालकञ्चैव मेखलाद्याविति क्रमात् ॥
प्रधानभूषणान्येषु यथा स्वं याति निश्चयः ।
पद्मरागञ्च वज्रञ्च विजयो गोविदस्तथा ॥
मुक्तावैदूर्य्यनीलञ्च यथा मरकतं क्रमात् ।
आदित्यादिदशानाञ्च सर्व्वसम्पत्तिदायकाः ॥
सुवर्णनापि घटना सर्व्वेषामुपयुज्यते ।
प्रधानभूषणेष्वेवमप्रधाने न निर्णयः ॥
प्रधानभूषणं प्रायः शिरसो ह्यभिधीयते ।
तस्य प्रधानभूतत्वादित्याह भृगुनन्दनः ।
सुखदा मणयः शुद्धा दुःखदा दोषशालिनः ॥"
इति युक्तिकल्पतरुः ॥
तद्धारणफलम् यथा,—
"भूषणं भूषयेदङ्गं यथायोग्यविधानतः ।
शुचिसौभाग्यसन्तोषदायकं काञ्चनं स्मृतम् ॥
ग्रहदृष्टिहरं पुष्टिकरं दुःखप्रणाशनम् ।
पापदौर्भाग्यशमनं रत्नाभरणधारणम् ॥
माणिक्यं तरणेः सुजात्यममलं मुक्ताफलम् शीतगो-
र्माहेयस्य च विद्रुमो निगदितः सौम्यस्य गारुत्मतम् ।
देवेज्यस्य च पुष्परागमसुराचार्य्यस्य वज्रं शने-
र्नीलं निर्म्मलमन्ययोश्च गदिते गोमेदवैदूर्य्यके ॥
वासः स्रगगन्धरत्नानां धारणं प्रीतिवर्द्धनम् ।
रक्षोघ्नमर्थ्यमोजस्यं सौभाग्यकरमुत्तमम् ॥"
इति भावप्रकाशः ॥

भूषणः, पुं, (भूषयति भक्तवृन्दमिति भूष्यतेऽनेनेति वा । भूष + ल्युः वा ल्युट् ।) विष्णुः । यथा,—
"भूशयो भूषणो भूतिर्विशोकः शोकनाशनः ।"
इति तस्य सहस्रनामस्तोत्रम् ॥
(राजविशेषः । यथा, कथासरित्सागरे । ४१ । १३ ।
"वसुदत्तादयश्चैते राजानोऽर्थरथा इमे ।
अङ्कुरो सुविशालश्च दण्डिभूषणसोमिलाः ॥")

भूषा, स्त्री, (भूष + भावे अः टाप् च ।) अलङ्क्रिया । इत्यमरः । २ । ६ । १०१ ॥ (यथा, भागवते । ३ । २२ । २२ ।
"दम्पत्योः पर्य्यदात् प्रीत्या भूषावासःपरिच्छदान् ॥")

भूषितः, त्रि, (भूष + क्तः ।) अलङ्कृतः । इत्यमरः । २ । ६ । १०० ॥ (यथा, भट्टिः ।६।७३।
"भृङ्गालीकोकिलक्रुड्भिर्वाशनैः पश्य लक्ष्मण ! ।
रौचनैर्भूषितां पम्पामस्माकं हृदयाविधम् ॥")